।। नमश्चण्डिकायै ।।

।। श्रीसच्चिदानन्दस्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै नमः ।।

श्रीविद्या-स्तोत्र-साधना

(श्रीशङ्करभगवत्पादाचार्यकृत-सौन्दर्यलहरी-कल्याणवृष्टिस्तव-
ब्रह्माण्डपुराणोक्त-ललिताष्टोत्तरशतनामावली-विभूषिता)

श्रीमत्परमहंस-परिव्राजकाचार्य-श्रोत्रियब्रह्मनिष्ठ-
श्रीमज्जगद्गुरु-शङ्कराचार्य-परम्परा-संवाहकानां
वृन्दावनस्थ-उमाशक्तिपीठाधीश्वराणाम्
अनन्तश्री-रामदेवानन्द-सरस्वती-स्वामिपादानाम्
(विश्वहिन्दुपरिषदः केन्द्रियमार्गदर्शकमण्डलस्थानाम्)
आज्ञया तदन्तेवासि-शिष्येण उमेश्वरदेवानन्दब्रह्मचारिणा

श्रीउमाशक्तिपीठम्
दुर्गापुरम्, पानीघाट, वृन्दावन, मथुरा (उ.प्र-२८११२१)
इत्यतो महाशिवरात्र्यां, वि.सं.२०८१ (२०२५ ई.) प्रकाशितः

।। श्रीराम समर्थ ।।

श्रीवृन्दावनीयोमापीठपरिचयः

--श्रीमत्परमहंसपरिव्राजकश्रीमत्परशिवावतारभगवत्पादशङ्करयतिवंशभानुप्रचारित-परमवैदिकनिर्विशेषकेवलाद्वैतवेदान्तराद्धान्तमानसराजमरालानाम्, आस्वादितश्रीसुरेश्वर-विद्यारण्यसर्वज्ञात्मादियतीन्द्रप्रसादितसत्साहित्यसुरद्रुमदिव्यफलानां, श्रीमत्पद्मपादपद-युगलकमलसेवनदत्तचित्तभ्रमराणां, जननमरणसंसरणरूपाध्यासोच्छेदनक्षमदेव्याराधन-समाहितमनस्कानां, श्रीशाङ्करसम्प्रदायोचितचितिकलोपासनधर्मरूपसर्वकर्मानुष्ठान-दीक्षानां, वर्णाश्रमधर्मनयरक्षणशिक्षणविचक्षणानां निगमागमसिद्धान्तसमुद्धरणपरायणानाम् अनन्तश्रीसमलङ्कृतानां श्रीश्रीमतां यमुनापश्चिमपुलिनवर्तिसर्वाम्नायवृन्दावनीयोमा-पीठाधिपानां दण्डिवर्याणां श्रीरामदेवानन्दसरस्वतीचरणानां प्राकट्योत्सवे केनचिच्छङ्कर-किङ्करेण साष्टाङ्गप्रणतिपूर्वकं विनिवेद्यन्ते चेमे श्लोकाः--

अनङ्गारिपरिष्वङ्गवाञ्छोत्सुककृपाकरी । वसतान्मानसेऽस्माकं काचित्त्रिपुरसुन्दरी ।।
गौडपादमुखोल्लासकरं बौद्धभयङ्करम् । आनन्दनिकरं ध्याये शङ्करं लोकशङ्करम् ।।
चन्द्रमौलीश्वरेणादौ दक्षयज्ञनिवारणे । शङ्करायास्तनुर्देव्याः कर्तितञ्चक्रपाणिना ।।
यत्र यत्र स्थितान्यस्याश्चाङ्गानि जगतीतले । सञ्ज्ञितानि ततस्तानि शक्तिपीठेतिसञ्ज्ञया
सर्वाण्येतानि पीठानि तन्त्रशास्त्रविदां मते ।
सिद्धिदानि हि लोकेऽस्मिन्भोगमोक्षफलानि च ।।
तेषु सातिशयं नित्यमुमापीठेति सञ्ज्ञितम् । भजते यमुनातीरे वृन्दारण्यरसस्थले ।।
महापुण्यमिदं पीठं वासुदेवेन सेवितम् । तपसाऽऽराधितं श्रीमद्राधाराधनवाञ्छया ।।
मूर्धजाश्च यतो देव्याः पतितान्यत्र दैवतः । ततस्तीर्थमिदं श्रेष्ठं लोके केशा यथा तनौ ।।
साधकं सर्वमन्त्राणां सर्वतन्त्रप्रचक्षितम् । सिद्धिदं सर्वलोकानां सेव्यमेतद्विचक्षणैः ।।
कात्यायनी महाशक्तिर्भूतेशो भैरवो मतौ ।
क्षंबीजञ्चिन्तितं चिन्त्यमस्य तन्त्रेषु सिद्धिदम् ।।
अप्रकाशिति तीर्थेऽस्मिन् कश्चिन्न्यासिशिरोमणिः। वामदेवगिरिर्भक्त्या चिन्तयामास धीधनः।
कथयामास योगीन्द्रः स्वशिष्यं तपसा वरम् ।
आनन्दरामदेवाख्यं पीठोद्धवधिया मुनिम् ।।
ततो गुरुवचोमानाद्गुर्वाराधनपण्डितः । पीठमुद्धावयामास उमाख्यं ब्रह्ममण्डितम् ।।
महाकामेशमहिषी सर्वसौभाग्यमन्दिरा । इन्दिरा राजते देवी चित्कलाविग्रहोत्तमा ।।
यथा पूर्णा विशालायां विमला पुरुषोत्तमे । कालिका दारुकक्षेत्रे तथेयमत्र वस्तुतः ।।
दर्शनीया ततः सद्भिर्भजनीया मनीषिभिः। चिन्तनीया सदा भक्त्या ध्यानयोगपरायणैः
--इति प्रणतितिभिर्नारायणस्मृतिभिश्च
प्रमाद्याश्विनशुक्लाद्वादश्यां (वि.२०७७) देहल्यामेव

।। श्रीगुरुभ्यो नमः ।। श्रीमहागणपतये नमः ।।

।। श्रीसच्चिदानन्दस्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै नमः ।।

श्रीविद्या-स्तोत्र-साधना

आ ब्रह्मलोकादाशेषादालोकालोकपर्वतात् ।
ये वसन्ति द्विजा देवास्तेभ्यो नित्यं नमाम्यहम् ।।
नारायणं पद्मभवं वसिष्ठं
शक्तिं च तत्पुत्रपराशरं च ।
व्यासं शुकं गौडपदं महान्तं
गोविन्दयोगीन्द्रमथास्यशिष्यम् ।।
श्रीशङ्करार्चार्यमथास्य पद्म-
पादं च हस्तामलकं च शिष्यं ।
तं त्रोटकं वार्तिककारमन्यान्
अस्मद्गुरून् सन्ततमानतोऽस्मि ।।

* * * * * *

गणञ्जाय नमः। गणपतये नमः। हेरम्बाय नमः। धरणीधराय नमः। महागणपतये नमः। लक्षप्रदाय नमः। क्षिप्रप्रसादनाय नमः। अमोघसिद्धये नमः। अमिताय नमः। मन्त्राय नमः। चिन्तामणये नमः। निधये नमः। सुमङ्गलाय

नमः। बीजाय नमः। आशापूरकाय नमः। वरदाय नमः। शिवाय नमः। काश्यपाय नमः। नन्दनाय नमः। वाचा सिद्धाय नमः। ढुण्ढिविनायकाय नमः ।।

नमो नमः सुरवरपूजिताङ्घ्रये
नमो नमो निरुपममङ्गलात्मने ।
नमो नमो विपुलपदैकसिद्धये
नमो नमः करिकलभाननाय ते ।।

* * * * * *

लौहित्यनिर्जितजपाकुसुमानुरागां
पाशाङ्कुशे धनुरिषूनपि धारयन्तीम् ।
ताम्रायतामरुणमाल्यविशेषशोभां
ताम्बूलपूरितमुखीं त्रिपुरां नमामि ।।

* * * * * *

।। सौन्दर्यलहरी ।।

(श्रीमच्छङ्करभगवत्पादाचार्यविरचिता)

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि ।
अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ।।१।।
तनीयांसं पांसुं तव चरणपङ्केरुहभवं
विरिञ्चिः सञ्चिन्वन् विरचयति लोकानविकलम् ।

वहत्येनं शौरिः कथमपि सहस्रेण शिरसां
हरः सङ्क्षुद्यैनं भजति भसितोद्धूलनविधिम् ।।२।।
अविद्यानामन्तस्तिमिरमिहिरद्वीपनगरी
जडानां चैतन्यस्तबकमकरन्दस्रुतिझरी ।
दरिद्राणां चिन्तामणिगुणनिका जन्मजलधौ
निमग्नानां दंष्ट्रा मुररिपुवराहस्य भवति ।।३।।
त्वदन्यः पाणिभ्यामभयवरदो दैवतगणः
त्वमेका नैवासि प्रकटितवराभीत्यभिनया ।
भयात् त्रातुं दातुं फलमपि च वाञ्छासमधिकं
शरण्ये लोकानां तव हि चरणावेव निपुणौ ।।४।।
हरिस्त्वामाराध्य प्रणतजनसौभाग्यजननीं
पुरा नारी भूत्वा पुररिपुमपि क्षोभमनयत् ।
स्मरोऽपि त्वां नत्वा रतिनयनलेह्येन वपुषा
मुनीनामप्यन्तः प्रभवति हि मोहाय महताम् ।।५।।
धनुः पौष्पं मौर्वी मधुकरमयी पञ्च विशिखा
वसन्तः सामन्तो मलयमरुदायोधनरथः ।
तथाप्येकः सर्वं हिमगिरिसुते कामपि कृपाम्
अपाङ्गात्ते लब्ध्वा जगदिदमनङ्गो विजयते ।।६।।
क्वणत्काञ्चीदामा करिकलभकुम्भस्तननता
परिक्षीणा मध्ये परिणतशरच्चन्द्रवदना ।
धनुर्बाणान् पाशं सृणिमपि दधाना करतलैः

पुरस्तादास्तां नः पुरमथितुराहोपुरुषिका ।।७।।
सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिवृते
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे ।
शिवाकारे मञ्चे परमशिवपर्यङ्कनिलयां
भजन्ति त्वां धन्याः कतिचन चिदानन्दलहरीम् ।।८।।
महीं मूलाधारे कमपि मणिपूरे हुतवहं
स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि ।
मनोऽपि भ्रूमध्ये सकलमपि भित्त्वा कुलपथं
सहस्रारे पद्मे सह रहसि पत्या विहरसे ।।९।।
सुधाधारासारैश्चरणयुगलान्तर्विगलितैः
प्रपञ्चं सिञ्चन्ती पुनरपि रसाम्नायमहसः।
अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयं
स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कुहरिणि ।।१०।।
चतुर्भिः श्रीकण्ठैः शिवयुवतिभिः पञ्चभिरपि
प्रभिन्नाभिः शम्भोर्नवभिरपि मूलप्रकृतिभिः ।
चतुश्चत्वारिंशद्वसुदलकलाश्रत्रिवलय-
त्रिरेखाभिः सार्धं तव शरणकोणाः परिणताः ।।११।।
त्वदीयं सौन्दर्यं तुहिनगिरिकन्ये तुलयितुं
कवीन्द्राः कल्पन्ते कथमपि विरिञ्चिप्रभृतयः ।
यदालोकौत्सुक्यादमरललना यान्ति मनसा
तपोभिर्दुष्प्रापामपि गिरिशसायुज्यपदवीम् ।।१२।।

नरं वर्षीयांसं नयनविरसं नर्मसु जडं
तवापाङ्गालोके पतितमनुधावन्ति शतशः ।
गलद्वेणीबन्धाः कुचकलशविस्रस्तसिचया
हठात् त्रुट्यत्काञ्च्यो विगलितदुकूला युवतयः ।।१३।।
क्षितौ षट्पञ्चाशद्द्विसमधिकपञ्चाशदुदके
हुताशे द्वाषष्टिश्चतुरधिकपञ्चाशदनिले ।
दिवि द्विःषट्त्रिंशन्मनसि च चतुःषष्टिरिति ये
मयूखास्तेषामप्युपरि तव पादाम्बुजयुगम् ।।१४।।
शरज्ज्योत्स्नाशुद्धां शशियुतजटाजूटमकुटां
वरत्रासत्राणस्फटिकघटिकापुस्तककराम् ।
सकृन्न त्वा नत्वा कथमिव सतां सन्निदधते
मधुक्षीरद्राक्षामधुरिमधुरीणाः फणितयः ।।१५।।
कवीन्द्राणां चेतःकमलवनबालातपरुचिं
भजन्ते ये सन्तः कतिचिदरुणामेव भवतीम् ।
विरिञ्चिप्रेयस्यास्तरुणतरुशृङ्गारलहरी-
गभीराभिर्वाग्भिर्विदधति सतां रञ्जनममी ।।१६।।
सवित्रीभिर्वाचां शशिमणिशिलाभङ्गरुचिभिः
वशिन्याद्याभिस्त्वां सह जननि सञ्चिन्तयति यः ।
स कर्ता काव्यानां भवति महतां भङ्गिरुचिभिः
वचोभिर्वाग्देवीवदनकमलामोदमधुरैः ।।१७।।
तनुच्छायाभिस्ते तरुणतरणिश्रीसरणिभिः

दिवं सर्वामुर्वीमरुणिमनि मग्नां स्मरति यः ।
भवन्त्यस्य त्रस्यद्वनहरिणशालीननयनाः
सहोर्वश्या वश्याः कति कति न गीर्वाणगणिकाः ।।१८।।
मुखं बिन्दुं कृत्वा कुचयुगमधस्तस्य तदधो
हरार्धं ध्यायेद्यो हरमहिषि ते मन्मथकलाम् ।
स सद्यः सङ्क्षोभं नयति वनिता इत्यतिलघु
त्रिलोकीमप्याशु भ्रमयति रवीन्दुस्तनयुगाम् ।।१९।।
किरन्तीमङ्गेभ्यः किरणनिकुरुम्बामृतरसं
हृदि त्वामाधत्ते हिमकरशिलामूर्तिमिव यः ।
स सर्पाणां दर्पं शमयति शकुन्ताधिप इव
ज्वरप्लुष्टान् दृष्ट्या सुखयति सुधाधारसिरया ।।२०।।
तटिल्लेखातन्वीं तपनशशिवैश्वानरमयीं
निषण्णां षण्णामप्युपरि कमलानां तव कलाम् ।
महापद्माटव्यां मृदितमलमायेन मनसा
महान्तः पश्यन्तो दधति परमाह्लादलहरीम् ।।२१।।
भवानि त्वं दासे मयि वितर दृष्टिं सकरुणाम्
इति स्तोतुं वाञ्छन् कथयति भवानि त्वमिति यः ।
तदैव त्वं तस्मै दिशसि निजसायुज्यपदवीं
मुकुन्दब्रह्मेन्द्रस्फुटमकुटनीराजितपदाम् ।।२२।।
त्वया हृत्वा वामं वपुरपरितृप्तेन मनसा
शरीरार्धं शम्भोरपरमपि शङ्के हृतमभूत् ।

यदेतत्त्वद्रूपं सकलमरुणाभं त्रिनयनं
कुचाभ्यामानम्रं कुटिलशशिचूडालमकुटम् ।।२३।।
जगत्सूते धाता हरिरवति रुद्रः क्षपयते
तिरस्कुर्वन्नेतत्स्वमपि वपुरीशस्तिरयति ।
सदापूर्वः सर्वं तदिदमनुगृह्णाति च शिवः
तवाऽऽज्ञामालम्ब्य क्षणचलितयोर्भ्रूलतिकयोः ।।२४।।
त्रयाणां देवानां त्रिगुणजनितानां तव शिवे
भवेत्पूजा पूजा तव चरणयोर्या विरचिता ।
तथाहि त्वत्पादोद्वहनमणिपीठस्य निकटे
स्थिता ह्येते शश्वन्मुकुलितकरोत्तंसमकुटाः ।।२५।।
विरिञ्चिः पञ्चत्वं व्रजति हरिराप्नोति विरतिं
विनाशं कीनाशो भजति धनदो याति निधनम् ।
वितन्द्री माहेन्द्री विततिरपि सम्मीलितदृशा
महासंहारेऽस्मिन् विहरति सति त्वत्पतिरसौ ।।२६।।
जपो जल्पः शिल्पं सकलमपि मुद्राविरचना
गतिः प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः ।
प्रणामः संवेशः सुखमखिलमात्मार्पणदृशा
सपर्यापर्यायस्तव भवतु यन्मे विलसितम् ।।२७।।
सुधामप्यास्वाद्य प्रतिभयजरामृत्युहरिणीं
विपद्यन्ते विश्वे विधिशतमखाद्या दिविषदः ।
करालं यत्क्ष्वेलं कबलितवतः कालकलना

न शम्भोस्तन्मूलं तव जननि ताटङ्कमहिमा ।।२८।।
किरीटं वैरिञ्चं परिहर पुरः कैटभभिदः
कठोरे कोटीरे स्खलसि जहि जम्भारिमकुटम् ।
प्रणम्रेष्वेतेषु प्रसभमुपयातस्य भवनं
भवस्याभ्युत्थाने तव परिजनोक्तिर्विजयते ।।२९।।
स्वदेहोद्भूताभिर्घृणिभिरणिमाद्याभिरभितो
निषेव्ये नित्ये त्वामहमिति सदा भावयति यः ।
किमाश्चर्यं तस्य त्रिनयनसमृद्धिं तृणयतो
महासंवर्तागिनर्विरचयति नीराजनविधिम् ।।३०।।
चतुःषट्या तन्त्रैः सकलमतिसन्धाय भुवनं
स्थितस्तत्तत्सिद्धिप्रसवपरतन्त्रैः पशुपतिः ।
पुनस्त्वन्निर्बन्धादखिलपुरुषार्थैकघटना-
स्वतन्त्रं ते तन्त्रं क्षितितलमवातीतरदिदम् ।।३१।।
शिवः शक्तिः कामः क्षितिरथ रविः शीतकिरणः
स्मरो हंसः शक्रस्तदनु च परामारहरयः ।
अमी हृल्लेखाभिस्तिसृभिरवसानेषु घटिता
भजन्ते वर्णास्ते तव जननि नामावयवताम् ।।३२।।
स्मरं योनिं लक्ष्मीं त्रितयमिदमादौ तव मनोः
निधायैके नित्ये निरवधिमहाभोगरसिकाः ।
भजन्ति त्वां चिन्तामणिगुणनिबद्धाक्षवलयाः
शिवाग्नौ जुह्वानाः सुरभिघृतधाराहुतिशतैः ।।३३।।

शरीरं त्वं शम्भोः शशिमिहिरवक्षोरुहयुगं
तवात्मानं मन्ये भगवति नवात्मानमनघम् ।
अतश्शेषः शेषीत्ययमुभयसाधारणतया
स्थितः सम्बन्धो वां समरसपरानन्दपरयोः ।।३४।।
मनस्त्वं व्योम त्वं मरुदसि मरुत्सारथिरसि
त्वमापस्त्वं भूमिस्त्वयि परिणतायां न हि परम् ।
त्वमेव स्वात्मानं परिणमयितुं विश्ववपुषा
चिदानन्दाकारं शिवयुवति भावेन बिभृषे ।।३५।।
तवाऽऽज्ञाचक्रस्थं तपनशशिकोटिद्युतिधरं
परं शम्भुं वन्दे परिमिलितपार्श्वं परचिता ।
यमाराध्यन् भक्त्या रविशशिशुचीनामविषये
निरालोकेऽलोके निवसति हि भालोकभुवने ।।३६।।
विशुद्धौ ते शुद्धस्फटिकविशदं व्योमजनकं
शिवं सेवे देवीमपि शिवसमानव्यवासिताम् ।
ययोः कान्त्या यान्त्याः शशिकिरणसारूप्यसरणेः
विधूतान्तर्ध्वान्ता विलसति चकोरीव जगती ।।३७।।
समुन्मीलत्संवित्कमलमकरन्दैकरसिकं
भजे हंसद्वन्द्वं किमपि महतां मानसचरम् ।
यदालापादष्टादशगुणितविद्यापरिणतिः
यदादत्ते दोषाद्गुणमखिलमद्भ्यः पय इव ।।३८।।
तव स्वाधिष्ठाने हुतवहमधिष्ठाय निरतं

तमीडे संवर्तं जननि महतीं तां च समयाम् ।
यदालोके लोकान् दहति महति क्रोधकलिते
दयार्द्रा या दृष्टिः शिशिरमुपचारं रचयति ।।३९।।
तटित्त्वन्तं शक्त्या तिमिरपरिपन्थिस्फुरणया
स्फुरन्नानारत्नाभरणपरिणद्धेन्द्रधनुषम् ।
तव श्यामं मेघं कमपि मणिपूरैकशरणं
निषेवे वर्षन्तं हरमिहिरतप्तं त्रिभुवनम् ।।४०।।
तवाधारे मूले सह समयया लास्यपरया
नवात्मानं मन्ये नवरसमहाताण्डवनटम् ।
उभाभ्यामेताभ्यामुदयविधिमुद्दिश्य दयया
सनाथाभ्यां जज्ञे जनकजननीमज्जगदिदम् ।।४१।।
गतैर्माणिक्यत्वं गगनमणिभिः सान्द्रघटितं
किरीटं ते हैमं हिमगिरिसुते कीर्तयति यः ।
स नीडेयच्छायाच्छुरणशबलं चन्द्रशकलं
धनुः शौनासीरं किमिति न निबध्नाति धिषणाम् ।।४२।।
धुनोतु ध्वान्तं नस्तुलितदलितेन्दीवरवनं
घनस्निग्धश्लक्ष्णं चिकुरनिकुरुम्बं तव शिवे ।
यदीयं सौरभ्यं सहजमुपलब्धुं सुमनसो
वसन्त्यस्मिन्मन्ये वलमथनवाटीविटपिनाम् ।।४३।।
तनोतु क्षेमं नस्तव वदनसौन्दर्यलहरी-
परीवाहः स्रोतःसरणिरिव सीमन्तसरणिः ।

वहन्ती सिन्दूरं प्रबलकबरीभारतिमिर-
द्विषां बृन्दैर्बन्दीकृतमिव नवीनार्ककिरणम् ।।४४।।
अरालैः स्वाभाव्यादलिकलभसश्रीभिरलकैः
परीतं ते वक्त्रं परिहसति पङ्केरुहरुचिम् ।
दरस्मेरे यस्मिन् दशनरुचिकिञ्जल्करुचिरे
सुगन्धौ माद्यन्ति स्मरदहनचक्षुर्मधुलिहः ।।४५।।
ललाटं लावण्यद्युतिविमलमाभाति तव यद्
द्वितीयं तन्मन्ये मकुटघटितं चन्द्रशकलम् ।
विपर्यासन्यासादुभयमपि सम्भूय च मिथः
सुधालेपस्यूतिः परिणमति राकाहिमकरः ।।४६।।
भ्रुवौ भुग्ने किञ्चिद्भुवनभयभङ्गव्यसनिनि
त्वदीये नेत्राभ्यां मधुकररुचिभ्यां धृतगुणम् ।
धनुर्मन्ये सव्येतरकरगृहीतं रतिपतेः
प्रकोष्ठे मुष्टौ च स्थगयति निगूढान्तरमुमे ।।४७।।
अहः सूते सव्यं तव नयनमर्कात्मकतया
त्रियामां वामं ते सृजति रजनीनायकतया ।
तृतीया ते दृष्टिर्दरदलितहेमाम्बुजरुचिः
समाधत्ते सन्ध्यां दिवसनिशयोरन्तरचरीम् ।।४८।।
विशाला कल्याणी स्फुटरुचिरयोध्या कुवलयैः
कृपाधाराधारा किमपि मधुराभोगवतिका ।
अवन्ती दृष्टिस्ते बहुनगरविस्तारविजया

ध्रुवं तत्तन्नामव्यवहरणयोग्या विजयते ।।४९।।
कवीनां सम्दर्भस्तबकमकरन्दैकरसिकं
कटाक्षव्याक्षेपभ्रमरकलभौ कर्णयुगलम् ।
अमुञ्चन्तौ दृष्ट्वा तव नवरसास्वादतरला-
वसूयासंसर्गादलिकनयनं किञ्चिदरुणम् ।।५०।।
शिवे शृङ्गारार्द्रा तदितरजने कुत्सनपरा
सरोषा गङ्गायां गिरिशचरिते विस्मयवती ।
हराहिभ्यो भीता सरसिरुहसौभाग्यजननी
सखीषु स्मेरा ते मयि जननि दृष्टिः सकरुणा ।।५१।।
गते कर्णाभ्यर्णं गरुत इव पक्ष्माणि दधती
पुरां भेत्तुश्चित्तप्रशमरसविद्रावणफले ।
इमे नेत्रे गोत्राधरपतिकुलोत्तंसकलिके
तवाकर्णाकृष्टस्मरशरविलासं कलयतः ।।५२।।
विभक्तत्रैवर्ण्यं व्यतिकरितलीलाञ्जनतया
विभाति त्वन्नेत्रत्रितयमिदमीशानदयिते
पुनः स्रष्टुं देवान्द्रुहिणहरिरुद्रानुपरतान्
रजः सत्त्वं बिभ्रत्तम इति गुणानां त्रयमिव ।।५३।।
पवित्रीकर्तुं नः पशुपतिपराधीनहृदये
दयामित्रैर्नेत्रैररुणधवलश्यामरुचिभिः ।
नदः शोणो गङ्गा तपनतनयेति ध्रुवममुं
त्रयाणां तीर्थानामुपनयसि सम्भेदमनघम् ।।५४।।

निमेषोन्मेषाभ्यां प्रलयमुदयं याति जगती
तवेत्याहुः सन्तो धरणिधरराजन्यतनये ।
त्वदुन्मेषाज्जातं जगदिदमशेषं प्रलयतः
परित्रातुं शङ्के परिहृतनिमेषास्तव दृशः ।।५५।।
तवापर्णे कर्णेजपनयनपैशुन्यचकिता
निलीयन्ते तोये नियतमनिमेषाः शफरिकाः ।
इयं च श्रीर्बद्धच्छदपुटकवाटं कुवलयं
जहाति प्रत्यूषे निशि च विघटय्य प्रविशति ।।५६।।
दृशा द्राघीयस्या दरदलितनीलोत्पलरुचा
दवीयांसं दीनं स्नपय कृपया मामपि शिवे ।
अनेनायं धन्यो भवति न च ते हानिरियता
वने वा हर्म्ये वा समकरनिपातो हिमकरः ।।५७।।
अरालं ते पालीयुगलमगराजन्यतनये
न केषामाधत्ते कुसुमशरकोदण्डकुतुकम् ।
तिरश्चीनो यत्र श्रवणपथमुल्लङ्घ्य विलसन्
अपाङ्गव्यासङ्गो दिशति शरसन्धानधिषणाम् ।।५८।।
स्फुरद्गण्डाभोगप्रतिफलिततादङ्कयुगलं
चतुश्चक्रं मन्ये तव मुखमिदं मन्मथरथम् ।
यमारुह्य द्रुह्यत्यवनिरथमर्केन्दुचरणं
महावीरो मारः प्रमथपतये सज्जितवते ।।५९।।
सरस्वत्याः सूक्तीरमृतलहरीकौशलहरीः

पिबन्त्याः शर्वाणि श्रवणचुलुकाभ्यामविरलम् ।
चमत्कारश्लाघाचलितशिरसः कुण्डलगणो
झणत्कारैस्तारैः प्रतिवचनमाचष्ट इव ते ।।६०।।
असौ नासावंशस्तुहिनगिरिवंशध्वजपटि
त्वदीयो नेदीयः फलतु फलमस्माकमुचितम् ।
वहत्यन्तर्मुक्ताः शिशिरकरनिश्वासगलितं
समृद्ध्या यत्तासां बहिरपि च मुक्तामणिधरः ।।६१।।
प्रकृत्या रक्तायास्तव सुदति दन्तच्छदरुचेः
प्रवक्ष्ये सादृश्यं जनयतु फलं विद्रुमलता ।
न बिम्बं तद्बिम्बप्रतिफलनरागादरुणितं
तुलामध्यारोढुं कथमिव विलज्जेत कलया ।।६२।।
स्मितज्योत्स्नाजालं तव वदनचन्द्रस्य पिबतां
चकोराणामासीदतिरसतया चञ्चुजडिमा ।
अतस्ते शीतांशोरमृतलहरीमाम्लरुचयः
पिबन्ति स्वच्छन्दं निशिनिशि भृशं काञ्जिकधिया ।।६३।।
अविश्रान्तं पत्युर्गुणगणकथाम्रेडनजपा
जपापुष्पच्छाया तव जननि जिह्वा जयति सा ।
यदग्रासीनायाः स्फटिकदृषदच्छच्छविमयी
सरस्वत्या मूर्तिः परिणमति माणिक्यवपुषा ।।६४।।
रणे जित्वा दैत्यानपहृतशिरस्त्रैः कवचिभिः
निवृत्तैश्चण्डांशत्रिपुरहरनिर्माल्यविमुखैः ।

विशाखेन्द्रोपेन्द्रैः शशिविशदकर्पूरशकला
विलीयन्ते मातस्तव वदनताम्बूलकबलाः ।।६५।।
विपञ्च्या गायन्ती विविधमपदानं पशुपतेः
त्वयाऽऽरब्धे वक्तुं चलितशिरसा साधुवचने ।
तदीयैर्माधुर्यैरपलपिततन्त्रीकलरवां
निजां वीणां वाणी निचुलयति चोलेन निभृतम् ।।६६।।
कराग्रेण स्पृष्टं तुहिनगिरिणा वत्सलतया
गिरीशेनोदस्तं मुहुरधरपानाकुलतया ।
करग्राह्यं शम्भोर्मुखमुकुरवृन्तं गिरिसुते
कथङ्कारं ब्रूमस्तव चुबुकमौपम्यरहितम् ।।६७।।
भुजाश्लेषान्नित्यं पुरदमयितुः कण्टकवती
तव ग्रीवा धत्ते मुखकमलनालश्रियमियम् ।
स्वतः श्वेता कालागुरुबहुलजम्बालमलिना
मृणालीलालित्यं वहति यदधो हारलतिका ।।६८।।
गले रेखास्तिस्रो गतिगमकगीतैकनिपुणे
विवाहव्यानद्धप्रगुणगुणसङ्ख्याप्रतिभुवः ।
विराजन्ते नानाविधमधुररागाकरभुवां
त्रयाणां ग्रामाणां स्थितिनियमसीमान इव ते ।।६९।।
मृणालीमृद्वीनां तव भुजलतानां चतसृणां
चतुर्भिः सौन्दर्यं सरसिजभवः स्तौति वदनैः ।
नखेभ्यः सन्त्रस्यन् प्रथममथनादन्धकरिपोः

चतुर्णां शीर्षाणां सममभयहस्तार्पणधिया ।।७०।।
नखानामुद्योतैर्नवनलिनरागं विहसतां
कराणां ते कान्तिं कथय कथयामः कथमुमे ।
कयाचिद्वा साम्यं भजतु कलया हन्त कमलं
यदि क्रीडल्लक्ष्मीचरणतललाक्षारसचणम् ।।७१।।
समं देवि स्कन्दद्विपवदनपीतं स्तनयुगं
तवेदं नः खेदं हरतु सततं प्रस्नुतमुखम् ।
यदालोक्याशङ्काकुलितहृदयो हासजनकः
स्वकुम्भौ हेरम्बः परिमृशति हस्तेन झडिति ।।७२।।
अमू ते वक्षोजावमृतरसमाणिक्यकुतुपौ
न सन्देहस्पन्दो नगपतिपताके मनसि नः ।
पिबन्तौ तौ यस्मादविदितवधूसङ्गरसिकौ
कुमारावद्यापि द्विरदवदनक्रौञ्चदलनौ ।।७३।।
वहत्यम्बस्तम्बेरमदनुजकुम्भप्रकृतिभिः
समारब्धां मुक्तामणिभिरमलां हारलतिकाम् ।
कुचाभोगो बिम्बाधररुचिभिरन्तः शबलितां
प्रतापव्यामिश्रां पुरदमयितुः कीर्तिमिव ते ।।७४।।
तव स्तन्यं मन्ये धरणिधरकन्ये हृदयतः
पयःपारावारः परिवहति सारस्वतमिव ।
दयावत्या दत्तं द्रविडशिशुरास्वाद्य तव यत्
कवीनां प्रौढानामजनि कमनीयः कवयिता ।।७५।।

हरक्रोधज्वालावलिभिरवलीढेन वपुषा
गभीरे ते नाभीसरसि कृतसङ्गो मनसिजः ।
समुत्तस्थौ तस्मादचलतनये धूमलतिका
जनस्तां जानीते तव जननि रोमावलिरिति ।।७६।।
यदेतत्कालिन्दीतनुतरतरङ्गाकृति शिवे
कृशे मध्ये किञ्चिज्जननि तव यद्भाति सुधियाम् ।
विमर्दादन्योन्यं कुचकलशयोरन्तरगतं
तनूभूतं व्योम प्रविशदिव नाभिं कुहरिणीम् ।।७७।।
स्थिरो गङ्गावर्तः स्तनमुकुलरोमावलिलता-
कलावालं कुण्डं कुसुमशरतेजोहुतभुजः ।
रतेर्लीलागारं किमपि तव नाभिर्गिरिसुते
बिलद्वारं सिद्धेर्गिरिशनयनानां विजयते ।।७८।।
निसर्गक्षीणस्य स्तनतटभरेण क्लमजुषो
नमन्मूर्तेर्नारीतिलक शनकैस्त्रुट्यत इव ।
चिरं ते मध्यस्य त्रुटिततटिनीतीरतरुणा
समावस्थास्थेम्नो भवतु कुशलं शैलतनये ।।७९।।
कुचौ सद्यः स्विद्यत्तटघटितकूर्पासभिदुरौ
कषन्तौ दोर्मूले कनककलशाभौ कलयता ।
तव त्रातुं भङ्गादलमिति वलग्नं तनुभुवा
त्रिधा नद्धं देवि त्रिवलि लवलीवल्लिभिरिव ।।८०।।
गुरुत्वं विस्तारं क्षितिधरपतिः पार्वति निजात्

नितम्बादाच्छिद्य त्वयि हरणरूपेण निदधे ।
अतस्ते विस्तीर्णो गुरुरयमशेषां वसुमतीं
नितम्बप्राग्भारः स्थगयति लघुत्वं नयति च ।।८१।।
करीन्द्राणां शुण्डान् कनककदलीकाण्डपटलीम्
उभाभ्यामूरुभ्यामुभयमपि निर्जित्य भवति ।
सुवृत्ताभ्यां पत्युः प्रणतिकठिनाभ्यां गिरिसुते
विधिज्ञे जानुभ्यां विबुधकरिकुम्भद्वयमसि ।।८२।।
पराजेतुं रुद्रं द्विगुणशरगर्भौ गिरिसुते
निषङ्गौ जङ्घे ते विषमविशिखो बाढमकृत ।
यदग्रे दृश्यन्ते दशशरफलाः पादयुगली-
नखाग्रच्छद्मानः सुरमकुटशाणैकनिशिताः ।।८३।।
श्रुतीनां मूर्धानो दधति तव यौ शेखरतया
ममाप्येतौ मातश्शिरसि दयया धेहि चरणौ ।
ययोः पाद्यं पाथः पशुपतिजटाजूटतटिनी
ययोर्लाक्षालक्ष्मीररुणहरिचूडामणिरुचिः ।।८४।।
नमोवाकं ब्रूमो नयनरमणीयाय पदयोः
तवास्मै द्वन्द्वाय स्फुटरुचिरसालक्तकवते ।
असूयत्यत्यन्तं यदभिहननाय स्पृहयते
पशूनामीशानः प्रमदवनकङ्केलितरवे ।।८५।।
मृषा कृत्वा गोत्रस्खलनमथ वैलक्ष्यनमितं
ललाटे भर्तारं चरणकमले ताडयति ते ।

चिरादन्तश्शल्यं दहनकृतमुन्मूलितवता
तुलाकोटिक्वाणैः किलिकिलितमीशानरिपुणा ।।८६।।
हिमानीहन्तव्यं हिमगिरिनिवासैकचतुरौ
निशायां निद्राणं निशि चरमभागे च विशदौ ।
वरं लक्ष्मीपात्रं श्रियमतिसृजन्तौ समयिनां
सरोजं त्वत्पादौ जननि जयतश्चित्रमिह किम् ।।८७।।
पदं ते कीर्तीनां प्रपदमपदं देव विपदां
कथं नीतं सद्भिः कठिनकमठीकर्परतुलाम् ।
कथं वा बाहुभ्यामुपयमनकाले पुरभिदा
यदादाय न्यस्तं दृषदि दयमानेन मनसा ।।८८।।
नखैर्नाकस्त्रीणां करकमलसङ्कोचशशिभिः
तरूणां दिव्यानां हसत इव ते चण्डि चरणौ ।
फलानि स्वस्थेभ्यः किसलयकराग्रेण ददतां
दरिद्रेभ्यो भद्रां श्रियमनिशमह्नाय ददतौ ।।८९।।
ददाने दीनेभ्यः श्रियमनिशमाशानुसदृशीम्
अमन्दं सौन्दर्यप्रकरमकरन्दं विकिरति ।
तवास्मिन्मन्दारस्तबकसुभगे यातु चरणे
निमज्जन्मज्जीवः करणचरणः षट्चरणताम् ।।९०।।
पदन्यासक्रीडापरिचयमिवारब्धुमनसः
स्खलन्तस्ते खेलं भवनकलहंसा न जहति ।
अतस्तेषां शिक्षां सुभगमणिमञ्जीररणित-

च्छलादाचक्षाणं चरणकमलं चारुचरिते ।।९१।।
गतास्ते मञ्चत्वं द्रुहिणहरिरुद्रेश्वरभृतः
शिवः स्वच्छच्छायाघटितकपटप्रच्छदपटः ।
त्वदीयानां भासां प्रतिफलनरागारुणतया
शरीरी शृङ्गारो रस इव दृशां दोग्धि कुतुकम् ।।९२।।
अराला केशेषु प्रकृतिसरला मन्दहसिते
शिरीषाभा चित्ते दृषदुपलशोभा कुचतटे ।
भृशं तन्वी मध्ये पृथुरुरसिजारोहविषये
जगत्त्रातुं शम्भोर्जयति करुणा काचिदरुणा ।।९३।।
कलङ्कः कस्तूरी रजनिकरबिम्बं जलमयं
कलाभिः कर्पूरैर्मरकतकरण्डं निबिडितम् ।
अतस्त्वद्भोगेन प्रतिदिनमिदं रिक्तकुहरं
विधिर्भूयो भूयो निबिडयति नूनं तव कृते ।।९४।।
पुरारातेरन्तःपुरमसि ततस्त्वच्चरणयोः
सपर्यामर्यादा तरलकरणानामसुलभा ।
तथा ह्येते नीताः शतमखमुखाः सिद्धिमतुलां
तव द्वारोपान्तस्थितिभिरणिमाद्याभिरमराः ।।९५।।
कलत्रं वैधात्रं कति कति भजन्ते न कवयः
श्रियो देव्याः को वा न भवति पतिः कैरपि धनैः ।
महादेवं हित्वा तव सति सतीनामचरमे
कुचाभ्यामासङ्गः कुरवकतरोरप्यसुलभः ।।९६।।

गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदो
हरेः पत्नीं पद्मां हरसहचरीमद्रितनयाम् ।
तुरीया कापि त्वं दुरधिगमनिःसीमामहिमा
महामाया विश्वं भ्रमयसि परब्रह्ममहिषि ।।९७।।
कदा काले मातः कथय कलितालक्तकरसं
पिबेयं विद्यार्थी तव चरणनिर्णेजनजलम् ।
प्रकृत्या मूकानामपि च कविताकारणतया
कदा धत्ते वाणीमुखकमलताम्बूलरसताम् ।।९८।।
सरस्वत्या लक्ष्म्या विधिहरिसपत्नो विहरते
रतेः पातिव्रत्यं शिथिलयति रम्येण वपुषा ।
चिरं जीवन्नेव क्षपितपशुपाशव्यतिकरः
परानन्दाभिख्यं रसयति रसं त्वद्भजनवान् ।।९९।।
प्रदीपज्वालाभिर्दिवसकरनीराजनविधिः
सुधासूतेश्चन्द्रोपलजललवैरर्घ्यरचना ।
स्वकीयैरम्भोभिः सलिलनिधिसौहित्यकरणं
त्वदीयाभिर्वाग्भिस्तव जननि वाचां स्तुतिरियम् ।।१००।।

* * * * * *

लौहित्यनिर्जितजपाकुसुमानुरागां
पाशाङ्कुशे धनुरिषूनपि धारयन्तीम् ।
ताम्रायतामरुणमाल्यविशेषशोभां
ताम्बूलपूरितमुखीं त्रिपुरां नमामि ।।

।। कल्याणवृष्टिस्तवः।।

(श्रीमच्छङ्करभगवत्पादाचार्यविरचितः)

कल्याणवृष्टिभिरिवामृतपूरिताभिः
लक्ष्मीस्वयंवरणमङ्गलदीपिकाभिः ।
सेवाभिरम्ब तव पादसरोजमूले
नाकारि किं मनसि भाग्यवतां जनानाम् ।।१।।
एतावदेव जननि स्पृहणीयमास्ते
त्वद्वन्दनेषु सलिलस्थगिते च नेत्रे ।
सान्निध्यमुद्यदरुणायुतसोदरस्य
त्वद्विग्रहस्य परया सुधयाप्लुतस्य ।।२।।
ईशत्वनामकलुषाः कति वा न सन्ति
ब्रह्मादयः प्रतिभवं प्रलयाभिभूताः ।
एकः स एव जननि स्थिरसिद्धिरास्ते
यः पादयोस्तव सकृत्प्रणतिं करोति ।।३।।
लब्ध्वा सकृत् त्रिपुरसुन्दरि तावकीनं
कारुण्यकन्दलितकान्तिभरं कटाक्षम् ।
कन्दर्पकोटिसुभगास्त्वयि भक्तिभाजः
सम्मोहयन्ति तरुणीर्भुवनत्रयेऽपि ।।४।।
ह्रींकारमेव तव नाम गृणन्ति वेदा
मातस्त्रिकोणनिलये त्रिपुरे त्रिनेत्रे ।
त्वत्संस्मृतौ यमभटाभिभवं विहाय

दीव्यन्ति नन्दनवने सह लोकपालैः ।।५।।
हन्तुः पुरामधिगलं परिपीयमानः
क्रूरः कथं न भविता गरलस्य वेगः ।
नाश्वासनाय यदि मातरिदं तवार्धं
देहस्य शश्वदमृताप्लुतशीतलस्य ।।६।।
सर्वज्ञतां सदसि वाक्पटुतां प्रसूते
देवि त्वदङ्घ्रिसरसीरुहयोः प्रणामः ।
किञ्च स्फुरन्मकुटमुज्ज्वलमातपत्रं
द्वे चामरे च महतीं वसुधां ददाति ।।७।।
कल्पद्रुमैरभिमतप्रतिपादनेषु
कारुण्यवारिधिभिरम्ब भवत्कटाक्षैः ।
आलोकय त्रिपुरसुन्दरि मामनाथं
त्वय्येव भक्तिभरितं त्वयि बद्धतृष्णम् ।।८।।
हन्तेतरेष्वपि मनांसि निधाय चान्ये
भक्तिं वहन्ति किल पामरदैवतेषु ।
त्वामेव देवि मनसा समनुस्मरामि
त्वामेव नौमि शरणं जननि त्वमेव ।।९।।
लक्ष्येषु सत्स्वपि कटाक्षनिरीक्षणानाम्
आलोकय त्रिपुरसुन्दरि मां कदाचित् ।
नूनं मया तु सदृशः करुणैकपात्रं
जातो जनिष्यति जनो न च जायते वा ।।१०।।

ह्रींह्रीमिति प्रतिदिनं जपतां तवाख्यां
किं नाम दुर्लभमिह त्रिपुराधिवासे ।
मालाकिरीटमदवारणमाननीया
तान् सेवते वसुमती स्वयमेव लक्ष्मीः ।।११।।
सम्पत्कराणि सकलेन्द्रियनन्दनानि
साम्राज्यदाननिरतानि सरोरुहाक्षि ।
त्वद्वन्दनानि दुरिताहरणोद्यतानि
मामेव मातरनिशं कलयन्तु नान्यम् ।।१२।।
कल्पोपसंहृतिषु कल्पिततताण्डवस्य
देवस्य खण्डपरशोः परभैरवस्य ।
पाशाङ्कुशैक्षवशरासनपुष्पबाणा
सा साक्षिणी विजयते तव मूर्तिरेका ।।१३।।
लग्नं सदा भवतु मातरिदं तवार्धं
तेजः परं बहुलकुङ्कुमपङ्कशोणम् ।
भास्वत्किरीटममृतांशुकलावतंसं
मध्ये त्रिकोणनिलयं परमामृतार्द्रम् ।।१४।।
ह्रींकारमेव तव नाम तदेव रूपं
त्वन्नाम दुर्लभमिह त्रिपुरे गृणन्ति ।
त्वत्तेजसा परिणतं वियदादिभूतं
सौख्यं तनोति सरसीरुहसम्भवादेः ।।१५।।
ह्रींकारत्रयसम्पुटेन महता मन्त्रेण सन्दीपितं

स्तोत्रं यः प्रतिवासरं तव पुरो मातर्जपेन्मन्त्रवित् ।
तस्य क्षोणिभुजो भवन्ति वशगा लक्ष्मीश्चिरस्थायिनी
वाणी निर्मलसूक्तिभारभरिता जागर्ति दीर्घं वयः ।।१६।।

* * * * * *

।। श्रीललिताष्टोत्तरशतनामावलिः।।

(ब्रह्माण्डपुराणोक्त-ललितासहस्रनामस्तोत्रतः परिकल्पिता)

१. श्रीमात्रे नमः (१)
२. देवकार्यसमुद्यतायै नमः (५)
३. देवर्षिगणसङ्घातस्तूयमानात्मवैभायै नमः (६४)
४. भक्तसौभाग्यदायिन्यै नमः (११७)
५. भक्तिप्रियायै नमः (११८)
६. भयापहायै नमः (१२१)
७. रागमथन्यै नमः (१५७)
८. मदनाशिन्यै नमः (१५९)
९. मोहनाशिन्यै नमः (१६३)
१०. ममताहन्त्र्यै नमः (१६५)
११. पापनाशिन्यै नमः (१६७)
१२. क्रोधशमन्यै नमः (१६९)
१३. लोभनाशिन्यै नमः (१७१)
१४. संशयघ्न्यै नमः (१७३)
१५. भवनाशिन्यै नमः (१७५)

१६. मृत्युमथन्यै नमः (१८१)

१७. दुर्गायै नमः (१९०)

१८. दुःखहन्त्र्यै नमः (१९१)

१९. सुखप्रदायै नमः (१९२)

२०. दुष्टदूरायै नमः (१९३)

२१. दुराचारशमन्यै नमः (१९४)

२२. दोषवर्जितायै नमः (१९५)

२३. सर्वज्ञायै नमः (१९६)

२४. समानाधिकवर्जितायै नमः (१९८)

२५. सर्वमन्त्रस्वरूपिण्यै नमः (२०४)

२६. सर्वयन्त्रात्मिकायै नमः (२०५)

२७. सर्वतन्त्ररूपायै नमः (२०६)

२८. महालक्ष्म्यै नमः (२१०)

२९. महापातकनाशिन्यै नमः (२१४)

३०. महात्रिपुरसुन्दर्यै नमः (२३४)

३१. चराचरजगन्नाथायै नमः (२४४)

३२. पार्वत्यै नमः (२४६)

३३. सृष्टिकर्त्र्यै नमः (२६४)

३४. गोप्त्र्यै नमः (२६६)

३५. संहारिण्यै नमः (२६८)

३६. तिरोधानकर्यै नमः (२७०)

३७. अनुग्रहदायै नमः (२७३)

३८. आब्रह्मकीटजनन्यै नमः (२८५)

३९. वर्णाश्रमविधायिन्यै नमः (२८६)

४०. निजाज्ञारूपनिगमायै नमः (२८७)

४१. पुण्यापुण्यफलप्रदायै नमः (२८८)

४२. राक्षसघ्न्यै नमः (३१८)

४३. करुणारससागरायै नमः (३२६)

४४. वेदवेद्यायै नमः (३३५)

४५. सदाचारप्रवर्तिकायै नमः (३५६)

४६. सद्यःप्रसादिन्यै नमः (३८३)

४७. शिवङ्कर्यै नमः (४०८)

४८. शिष्टेष्टायै नमः (४११)

४९. शिष्टपूजितायै नमः (४१२)

५०. गायत्र्यै नमः (४२०)

५१. निस्सीममहिम्ने नमः (४२९)

५२. समस्तभक्तसुखदायै नमः (५०२)

५३. पुण्यलभ्यायै नमः (५४३)

५४. बन्धमोचन्यै नमः (५४६)

५५. सर्वव्याधिप्रशमन्यै नमः (५५१)

५६. सर्वमृत्युनिवारिण्यै नमः (५५२)

५७. कलिकल्मषनाशिन्यै नमः (५५५)

५८. नित्यतृप्तायै नमः (५६६)

५९. मैत्र्यादिवासनालभ्यायै नमः (५७०)

६०. हृदयस्थायै नमः (५९५)

६१. दैत्यहन्त्र्यै नमः (५९९)

६२. गुरुमूर्तये नमः (६०३)

६३. गोमात्रे नमः (६०५)

६४. कैवल्यपददायिन्यै नमः (६२५)

६५. त्रिजगद्वन्द्यायै नमः (६२७)

६६. वागधीश्वर्यै नमः (६४०)

६७. ज्ञानदायै नमः (६४३)

६८. सर्ववेदान्तसंवेद्यायै नमः (६४५)

६९. योगदायै नमः (६५४)

७०. निर्द्वैतायै नमः (६६७)

७१. द्वैतविवर्जितायै नमः (६६८)

७२. अन्नदायै नमः (६६९)

७३. वसुदायै नमः (६७०)

७४. भाषारूपायै नमः (६७८)

७५. सुखाराध्यायै नमः (६८१)

७६. राजराजेश्वर्यै नमः (६८४)

७७. राज्यदायिन्यै नमः (६८५)

७८. सर्वार्थदात्र्यै नमः (६९८)

७९. सच्चिदानन्दरूपिण्यै नमः (७००)

८०. सरस्वत्यै नमः (७०४)

८१. दक्षिणामूर्तिरूपिण्यै नमः (७२५)

८२. सनकादिसमाराध्यायै नमः (७२६)

८३. नामपारायणप्रीतायै नमः (७३२)

८४. मिथ्याजगदधिष्ठानायै नमः (७३५)

८५. स्वर्गापवर्गदायै नमः (७६४)

८६. परमन्त्रविभेदिन्यै नमः (८१२)

८७. सर्वान्तर्यामिण्यै नमः (८१९)

८८. जन्ममृत्युजरातप्तजनविश्रान्तिदायिन्यै नमः (८५१)

८९. सर्वोपनिषदुद्घुष्टायै नमः (८५२)

९०. लीलाविग्रहधारिण्यै नमः (८६५)

९१. अजायै नमः (८६६)

९२. क्षयविनिर्मुक्तायै नमः (८६७)

९३. क्षिप्रप्रसादिन्यै नमः (८६९)

९४. संसारपङ्कनिर्मग्नसमुद्धरणपण्डितायै नमः (८८०)

९५. धनधान्यविवर्धिन्यै नमः (८८६)

९६. तत्त्वमर्थस्वरूपिण्यै नमः (९०८)

९७. सर्वापद्विनिवारिण्यै नमः (९१३)

९८. स्वभावमधुरायै नमः (९१५)

९९. सदातुष्टायै नमः (९२१)

१००. धर्मवर्धिन्यै नमः (९५९)

१०१. सुवासिन्यै नमः (९७०)

१०२. सुवासिन्यर्चनप्रीतायै नमः (९७१)

१०३. वाञ्छितार्थप्रदायिन्यै नमः (९८९)

१०४. अव्याजकरुणामूर्तये नमः (९९२)

१०५. अज्ञानध्वान्तदीपिकायै नमः (९९३)

१०६. आबालगोपविदितायै नमः (९९४)

१०७. सर्वानुल्लङ्घ्यशासनायै नमः (९९५)

१०८. ललिताम्बिकायै नमः (१०००)

श्रीसच्चिदानन्दस्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै नमः

* * * * * *

अरुणां करुणातरङ्गिताक्षीं
धृतपाशाङ्कुशबाणचापहस्ताम् ।
अणिमादिभिरावृतां मयूखैः
अहमित्येव विभावये भवानीम् ।।
पातय वा पाताले स्थापय वा सकललोकसाम्राज्ये ।
मातस्तवाङ्घ्रिमूलं नाहं मुञ्चामि नैव मुञ्चामि ।।
अनेन स्तोत्रपाठकर्मणा सच्चिदानन्दस्वरूपिणी
भगवती राजराजेश्वरी त्रिपुरसुन्दरी सुप्रीता सुप्रसन्ना
वरदा भवतु । सत्याः सन्तु मम कामाः ।
।। श्रीजगदम्बार्पणमस्तु ।।